## अध्याय :- २५

Chapter-25

अर्जुन उवाच ।।

देवर्षे वर्ण्यते चेयं[१] कथा पीयुषासोदरा ।।

पुनरेतन्मुने ब्रूहि यदा वेत्ति महेश्वरः ।। १

भगवान्स्वां सतीं[२] भार्यां वधार्थं चापि तारकम् ।।

सत्याश्च विरहात्तप्यन्ददाह किम सौ स्मरम् ।। २

त्वयैवोक्तं स विरहात्सत्यास्तप्यति वै तपः ।।

हिमाद्रिमास्थितो देवस्तस्याः संगम वांछया ।। ३

नारद उवाच ।।[३]

सत्यमेतत्पुरा[४] पार्थ भवस्येदं मनीषितम् ।।

अतप्ततपसा योगो न कर्तव्यो मया/नया ।। ४

तपोऽविना शुद्ध[५]देहो न कथंचन जायते ।।

अशुद्धदेहेन समं संयोगो नैव दैहिकः ।। ५

महत्कर्माणि यानीह तेषां मूलं सदा तपः ।।

नातप्ततपसां सिद्धिर्महत्कर्माणि यांति वै ।। ६

एतस्मात्कारणादेवो दर्पितं तं ददाह तु ।।

ततो दग्धे स्मरे चापि पार्वतीमपि[६]व्रीडिताम् ।। ७

---

१ अ. कवे कैयं

२ ब. सती

३ ब. श्री नारद उ० ।।

४ अ. ब. पुनः

५ अ. देहं

६ ति अ. पाठः ।

विहाय सगणो देवः कैलासं समपद्यत ।।
देवी ब्र च परमोद्विग्ना प्रस्खलंती पदेऽपदे ।। ८

बीवितं स्वं विनिदंती भ्रामितस्ततश्च सा ।।
हिमाद्रिरपि स्वे श्रृंगे[1] रुदतीं पृष्टवान्‌तिम्‌ ।। ९

कासि कस्यासि कल्याणि किमर्थं चापि रोदिषी ।।
पृष्टा सा च रतिः सर्वं यथावृतं न्यवेदयत्‌ ।। १०

निवेदिते तथा रत्या शैलः संभ्रात मानसः ।।
प्राप्य स्वां तनयां पाणावादायाऽगात्स्वकं पुरम्‌ ।। ११

सा तत्र पितरौ प्राह सखीनां वदनेन च ।।
दुर्भगेन शरीरेण किमनेन[2] हि[3] कारणम्‌ ।। १२

देहवासं परित्यक्ष्ये प्राप्स्ये वाभिमतं पतिम्‌ ।।
असाध्यं चाप्यभीष्टं च कथं प्राप्यं तपो विना ।। १३

नियमैर्विविधैस्तस्माच्छोषायिष्ये कलेवरम्‌ ।।
अनुजानीत मां तत्र यदिवः करुणा मयि ।। १४

---

१ अ. श्रृंगी
२ अ. ब. किममाने
३ "न" अ. पाठः

श्रुत्वेति वचनं माता पिता च प्राह तां शुभाम् ।।
उमेति चपले पुत्रि[1] न क्षमं तावकं वपुः ।। १५

सोढुं[2] क्लेशात्मरूपस्य तपसः सौम्यदर्शने ।।
भावीन्यवश्यनिवार्याणि वस्तूनि च सदैव तु ।। १६

भाविनोर्था भवंत्यैव नरस्यानिच्छतोपि हि ।।
तस्मान्न तपसा ते ऽस्ति बाले किंचित्प्रयोजनम् ।। १७

श्री देव्युवाच ।।
यदिदं भवतो वाक्यं न सम्यगिति मे मतिः ।।
केवलं न हि दैवेन प्राप्तुमर्थो हि शक्यते ।। १८

त्किंचिद्दैवाद्धठात्किं चित्किंचि देव स्वऽभावतः ।।
पुरुषाः फलमाप्नोति चतुर्थं नात्र कारणम् ।। १९

ब्रह्मणा चापि ब्रह्मत्वं प्राप्तं किल तपोबलात् ।।
अन्यैरपि च यत्लब्धं तन्न संख्यातुमुत्सहे ।। २०

अध्रुवेण शरीरेण यद्यभीष्टं न साध्यते ।।
पश्चात्तस शोच्यते मंदः पतिते ऽस्मिंछरीरके ।। २१

---

१ "देवि" अ. पाठः ।
२ ब. सोढु

यस्य देहस्य धर्मो/यं क्वचिज्जायेत्क्वचिन्म्रियेत् ।।
क्वचिद्गर्भगतं नश्येज्जातमात्रं क्वचित्तथा ।। २२

बाल्ये च यौवने[१] चापि[२] वार्धक्योपि विनश्यति ।।
तेन चंचलदेहेन को/र्थः स्वार्थो न चेदभवेत् ।। २३

इत्युक्त्वा स्वसखीयुक्ता पितृभ्यां साश्रु वीक्षिता ।।
शृंगं हिमवतः पुण्यं नानाश्चर्यं जगाम सा ।। २४

तत्रा वराणि संत्यज्य भूषणानि च शैलजा ।।
संवीता वल्कलै दिव्यैस्तपो/तप्यत संयता ।। २५

ईश्वरं त्वद्हृदि संस्थाप्य प्रणवाभ्यसनादता ।।
मुनीनामप्य भून्मान्या तदानीं पार्थ पार्वती ।। २६

त्रिस्त्राता पाटलापत्र भक्षकाभूच्छतं समाः ।।
शतं च बिल्वपत्रेण शीर्णेन कृत भोजना[३] ।। २७

जलभक्षा शतंचाभूच्छतं वै वायु भोजना ।।
ततो नियममादाय पादांगुष्ठ स्थिता भवत् ।। २८

---

१ ब. ~~प्रौढत्वे~~ यौवने
२ ब. वापि
३ ब. नाः

निराहारा ततस्तापं प्रापुस्तत्तपसो[1] जनाः ।।
ततो जगत्समालोक्य तदीयतप सोर्जितम् ।। २९

हरस्तत्रायया साक्षाद्ब्रह्मचारिवपुर्द्धरः ।।
वसानो वल्कलं दिव्यं रौरवाजिन संवृतः[2] ।। ३०

सुलक्षणाष्टाठधरः सद्वृतः प्रतिभानवान् ।।
ततस्तं पूजयामासुस्तत्सख्यो बहुमानतः ।। ३१

वक्तुमिच्छुः शैलपुत्रीं सखीभिरितिचोदितः[3] ।।
ब्रह्मन्नियं महाभागा गृहीतनियमा शुभा ।। ३२

मुहूर्त पंचमात्रेण नियमो/स्याः समाप्यते ।।
तत्पतीक्षस्व तं कालं पश्चादस्मत्सखीसमम् ।। ३३

नाना विधा धर्मवार्ताः प्रकरिष्यसि ब्राह्मण ।।
इत्युक्त्वा विजयाद्यास्ता देवीचरित वर्णनैः ।। ३४

अश्रुमुख्यो द्विजस्याग्रे निन्युः कालं च तं तदा ।।
ततःकाले किंचिदूने ब्रह्मचारी महामतिः ।। ३५

---

१ अ. तपसा

२ अ. संवृतं

३ अ. प्रोचितः

ब. प्रोवितः

विलोकनमिष्योणागादा श्रमोपस्थितं ह्यम् ।।
निपपात च तत्रासौ चुक्रोशातितरां ततः ।। ३६

अहमत्र[1] निमज्जामि कोऽपि[2] मामुद्धरेत भोः[3] ।।
इति तारेण[4] क्रोशंतं श्रुत्वा तं विजयादिकाः ।। ३७

आजग्मुस्त्वरया युक्ता ददुस्तस्मै करं च ताः ।।
स चुक्रोश[5] ततो गाढं दूरेदूरे पुनः पुनः ।। ३८

नाहं स्पृशाम्यसंसिद्धां प्रिये वा नानृतं त्विदम् ।।
ततः समाप्तनियमा पार्वती स्वयमायमौ ।। ३९

सव्यं करं ददावस्य तं चासौनाभ्यनन्दत ।।
भद्रे यच्छुचि नैव स्याद्यच्चैवावज्ञया कृतम् ।। ४०

स दोष्षेण कृतं यच्च तदादद्यान्न कर्हिचित् ।।
सव्यं चाशुचि ते हस्तं नावलंबामि कर्हिचित् ।। ४१

इत्युक्ता पार्वती प्राह नाहं दत्त च दक्षिणम् ।।
ददामि कस्यचिद्विप्र देवदेवाय कल्पितम् ।। ४२

---

१ "अहमत्र" अ. प्रतौ नास्ति ।
२ ब. कापि
३ ब. प्रभो
४ ब. स्वरेण
५ ब. चुक्रोध

दक्षिणं मे करं देवी ग्रहीता भव[1] एव च ।।
शीर्यति चोग्रतपसा सत्यमेतन्मयोदितम् ।। ४३

विप्र उवाच ।।
[2]यद्येवमवलेपस्ते गमनं केन वार्यते ।।
यथा[3]तव प्रतिज्ञेयं ममापीयं तथाचला ।। ४४

रुद्रस्यापि वयं मान्याः कीदृशं ते तपो[3]वद ।।
विषमस्थं यत्र विप्रं म्रियमाणमुपेक्षसि ।। ४५

अवजानासि विप्रांस्त्वं तच्छीघ्रं वज्र दर्शनात् ।।
यदि वा मन्यसे पूज्यांस्ततो/भ्युद्धर नान्यथा ।। ४६

ततो विचार्य बहुधा इति चेति च सा शुभा ।।
विप्रस्योद्धरणं सर्वधर्मेभ्यो/मन्यताधिकम् ।। ४७

ततः सा[4] दक्षिणं दत्वा करं तं प्रोज्जहार च ।।
नरं नारी प्रोद्धरति [5]सज्जन्तं भववारिधौ ।।
एतत्सन्दर्शनार्थाय तथा चक्रे भवोद्भवः ।। ४८

---

१ ब. भाव
२ ब. विद्धे
३ ब. तथा
४ ब. तपो
४ अ. स
५ "मज्जंतं भवभारिधौ" पाठः ।

प्रोद्धृत्य च ततः स्नात्वा बद्धा योगासनं स्थिता ।।*१ ४९

ब्रह्मचारी ततः प्राह प्रहसन्किमिदं शुभे ।।
कर्तुं कामासि तन्वंगि दृढयोगासने स्थिता ।। ५०

देवीप्राह ज्वालयिष्ये शरीरं योगवह्निना ।।
महादेवकृतमति रुच्छिष्टार्थं यतोऽभवम् ।। ५१

ब्रह्मचारी ततः प्राह काञ्चिद्ब्राह्मणकाम्यया ।।
कृत्वा वार्तास्ततः स्वीयमभीष्टं कुरु पार्वति[२] ।। ५२

नोपहन्या कदाचिद्ध साधुभिर्विप्रकामना ।।
धर्ममिनं मन्यसे चेन्मुहूर्तं ब्रूहि पार्वती ।। ५३

देवी प्राह ब्रूहि विप्र मुहुर्तं संस्थिता त्वहम् ।।
ततः स्वयं[३] व्रतीप्राह देवीं तां स्वसखीयुताम्[४] ।। ५४

किमर्थमिति रम्भोरु नवे वयसि दुष्करम् ।।
तपस्त्वया समारब्धं नानुरूपं विभाति मे ।। ५५

दुर्लभं प्राप्य मानुष्यं गिरिराजगृहेऽधुना ।।
भोगांश्च दुर्लभान्देवि त्यक्त्वा किं क्लिश्यते वपुः ।। ५६

---

*१ After the sloka No.49 there is written in the M.S.S. 'A'
इति श्री स्कंद पुराणे कुमारिका खंडे बटुकोद्धरणं ।।
Next sloka begins with the words - नारद उवाच ।।
which is not appear in the P.W.

२ अ. पार्वतिं

३ अ. स्मयन्

४ अ. सुयुतां

अतीव दूये वीक्ष्य त्वां सुकुमारतराकृतिम्[1] ।।
अत्युग्रतपसा क्लिष्टा पद्मिनीव हिमार्दिता[2] ।। ५७

इदं जान्यतव शुभे शिरसो रोगदं मम ।।
यदेहं व्युक्तृकामा त्वं प्रबुद्धा नासि बालिके ।। ५८

वामः कामो मनुष्येषु सत्यमेतद्वचो यतः ।।
स्पृहणीयासि सर्वेषामेवं पीडयसे वपुः ।। ५९

अविज्ञातान्वयो नग्नः शूली भूतगणाधिपः ।।
श्मशान निलयो भस्मोद्धूलनो वृषवाहनः ।। ६०

गजाजिनो द्विजिह्वाढ्यं कृतांगो जटाधरः ।।
विरूपाक्षः कथंकारं निर्गुणः स्यात्तवोचितः ।। ६१

गुणा ये कुलशीलाद्या वराणामुदिता बुधैः ।।
तेषामेकोऽपि नैवास्ति तस्मिंस्तन्नोचितः [illegible] ते ।। ६२

शोचनीयत मा पूर्वमासीत्पार्वती कौमुदी ।।
त्वं[3] संवृता द्वितीयासि तस्यास्तत्सगमाशया ।। ६३

---

१ ब. कृतिः
२ अ. ताम्
३ अ. प्रतौ नास्ति ।

तपोधनाः सर्वसमावयं यद्यपि पार्वती[१] ।।
[२]दुनोत्येव तवारंभः शूलायां[३] मुष्णासत्क्रिया ।। ६४

वृषा भारोहणं वासः श्मशाने पाणि संग्रहः ।।
सव्याल पाणिना क्षौमगजत्वगबंधनः[४] कथम् ।। ६५

जनहास्यकरं सर्वं त्वयारबुधम सांप्रतम् ।।
स्त्रीभावाद्भूति संपर्कः कथं चाभितस्तव ।। ६६

निवर्तय मनस्तस्मादस्मात्सर्व विरोधिनः ।।
मृगाक्षि मदनारातिर्मर्कटाक्षस्य प्रार्थनात्[५] ।। ६७

विरुद्ध[६]वादिनं चैवं ब्रह्मचारिणमीश्वरम् ।।
निशम्य कुपिता देवी प्राह वाचा सगद्गदम् ।। ६८

मा मा ब्राह्मण भाषिष्ठा विरुद्धमिति शंकरे ।।
महत्तमो याति पुमान्देव देवस्य निंदया ।। ६९

न सम्यगभिजानासि तस्य देवस्य चेष्टितम् ।।
श्रृणु ब्राह्मण त्वं पापाद्यथास्मात्परिमुच्यसे ।। ७०

---

१ ब्रौ. पार्वति
२ अ. तनो
३ ब. शीलाया
४ अ. बंधनं
५ अ. प्रार्थये ब. प्रार्थय
६ ब. वदनं

[1]स आदिः सर्व[2] जगतां कोस्य वेदान्वयं ततः ।।
सर्वं जगद्यस्य रूपं दिग्वासाः कीर्तयंति ततः ।। ७१

गुणत्रयमयं शूलं शूली यस्माद्बिभर्ति सः ।।
अबद्धाः सर्वतो मुक्ता भूता एव च तत्पतिः ।। ७२

श्मशानं चापि संसारस्तद्वासी कृपयार्थिनाम् ।।
भूतयः कथिता[3] भूतिस्तां बिभर्ति सभूतिभृत ।। ७३

वृषो धर्म इति प्रोक्तस्तमारूढस्ततो वृषी ।।
सर्पाश्च दोषाः क्रोधाद्यान्बिभर्ति जगन्मयः[4] ।। ७४

नानाविधाः कर्मयोगा जटारूपा बिभर्ति सः ।।
वेदत्रयी त्रिनेत्राणि त्रिपुरं त्रिगुणं वपुः ।। ७५

भस्मी करोति तदेवत्रि पुरघ्नस्ततः स्मृतः ।।
एवं विध[5] महादेवं विदुर्ये सूक्ष्मदर्शिनः ।। ७६

कथंकारं हि ते नाम भजंते नैव तं हरम् ।।
अथ वा भीत संसाराः[6] सर्वे विप्र यतो जनाः ।। ७७

---

१ ब. "आदि स" इति स्यात् ।
२ अ. सर्वस्य
३ ब. तौ
४ ब. जगन्मयः
५ अ. विधं
६ अ. संसारः

विमृश्य कुर्वते सर्वं विमृश्यैतन्मया कृतम् ।।
शुभं वाप्य शुभं वास्तु त्वमप्येनं प्रपूजय ।। ७८

इति ब्रुवंत्यां तस्यां तु[१] किंचित्प्रस्फुरिताधरम् ।।
विज्ञाय तां[२] सखीमाह किमप्येष विवक्षुकः ।। ७९

वार्यतामिति विप्रोऽयं महद्दुष्टाण भाषकः ।।
न केवलं पाप भागी श्रोता वै स्यान्न संशयः ।। ८०

अथ वा किं च नः कार्यं वादेन सह ब्राह्मणैः ।।
कर्णौ पिधाय यास्यामो यथा यः स्यात्तथास्तुसः ।। ८१

इत्युक्त्वोत्थाय गच्छत्यां पिधाय श्रवणावुभौ ।।
स्वरूपं समुपाश्रित्यजगृहे वसनं हरः ।। ८२

ततो निरीक्ष्य तं देवं संभ्रांता परमेश्वरी ।।
प्रणिपत्य महेशानं तुष्टावविनता उमा ।। ८३

प्राह तां च महादेवो दासोऽस्मि तव शोभने ।।
तपोद्रव्येण क्रीतश्च समादिश यथेप्सितम् ।। ८४

---

१ अ. प्रतौ "च" पाठः ।
२ अ. तं

देव्युवाच ।।[१]
मनसस्त्वं प्रभुः शंभोदत्त तच्चमया तव ।।
वप्रपुष्टाः पितरावीशौ तौ सम्मानयितुमर्हसि ।। ८५

महादेव उवाच ।।
पित्रा हि ते परिज्ञातं दृष्ट्वा त्वां रूपशालिनीम् ।।
बालां स्वयंवरं[२] पुत्रीमहं दास्यामि नान्यथा ।। ८६

तत्तस्य सर्वमिवास्तु वचनं त्वं हिमाचलम् ।।
स्वयंवरार्थं सुश्रोण्णि प्रेरय त्वां वृणो[३] ततः*[४] ।। ८७

इत्युक्त्वा तां महादेवः शुचि शुचिष्मादौ विभुः ।।
जगामेष्टं तदा देशं स्वपुरं प्रययौ च सा ।। ८८

दृष्ट्वा देवीं तदा त्दृष्टौ मेनयौ सहितौ चलः ।। ८९

स्वयंवरं प्रमुदितः सर्वलोकेष्वघोषायत् ।।
अश्विनौ द्वादशादित्या गन्धर्वगरुडोरगाः ।। ९०

यक्षाः सिद्धास्तथा साध्या दैत्याः किंपुरुषा नगाः ।।
समुद्राद्याश्च ये केचित्त्रै लोक्य प्रवराश्च ये ।। ९१

---

१ ब. श्री देव्युः २ अ. ब. वरे ३ ब. वृणो

४ * After the sloka No.87 there is written in the M.S.'A'
इति श्री स्कंद पुराणे कुमारिकाखंडे पार्वत्याः तपः फल प्राप्तिः ।।
Sloka No.88 begins with the words - नारद उवाच ।।
which is not appear in the P.W.

त्रयस्त्रिंशत्सहस्त्राणि त्रयस्त्रिंशच्छतानि च ।।
त्रयस्त्रिंशच्च ये देवास्त्रय स्त्रिंश च्च कोटयः ।। ९२

जग्मुर्गिरीन्द्र पुत्र्यास्तु स्वयंवरमनुत्तमम् ।।
आमंत्रितस्तथा विष्णुर्मेरुमाह हसन्निव ।। ९३

तातास्माकं च सा देवी मेरो गच्छनमामि ताम् ।।
अथ शैलसुता देवी हैममारुह्य शोभनम् ।। ९४

विमानं सर्वतोभद्रं सर्वरत्नैरलंकृतम् ।।
अप्सरोभिः प्रनृत्यद्भिः सर्वाभरण भूषिता ।। ९५

गंधर्व संघैविविधैः किंनरैश्च सुशोभनैः ।।
बंदिभिः स्तूयमाना च वीरकांस्यधरा स्थिता ।। ९६

सितात पत्र[१] रत्नां शुभमिश्रितं चावहत्तदा ।।
शालिनी नाम पार्वत्याः संध्यापूर्णेंदुमंडला[२] ।। ९७

चामरासक्त हस्ताभिर्दिव्य स्त्रीभिश्च संवृता[३] ।।
मालां प्रगृह्य सा तस्थौ सुरद्रुम समुद्भवाम् ।। ९८

---

१ अ. पत्रं
२ अ. लं
३ अ. ब. "संगता"

एवं तस्यां स्थितायां तु स्थिते लोकत्रये तदा ।।
शिशुर्भूत्वा महादेवः क्रीडार्थं वृषभध्वजः ।। ९९

उत्संगतलसंगुप्तो बभूव भगवान् भवः ।।
जयेति यत्पदं ख्यातं तस्य सत्यार्थमीश्वरम्[1] ।। १००

अथ दृष्ट्वा शिशुं देवास्तस्य उत्संगवर्तिनः ।।
कोयमत्रेति संमंत्र्य चक्रुशुर्भृशरोषिताः ।। १०१

वज्रमाहारयत्तस्य बाहुमुद्यम्य वृत्रहा ।।
स बाहुस्तब्धतस्तस्य तथैव समतिष्ठत ।। १०२

स्तंभितः शिशुरूपेण देवदेवेन लीलया ।।
वज्रं क्षेप्तुं न शक्नोति बाहुं च चालयितुं तदा ।। १०३

वह्निः शक्तिं तदा क्षेप्तुं न शशाक तथोत्थितः ।।
यमोऽपि दंडं खड्गं च[2] निर्ऋतिस्तं शिशुंप्रति ।। १०४

पाशं च वरुणो राजा ध्वजयष्टिं समीरणः ।।
सोमो गुडं धनेशश्च गदां सुमहतीं द्रढाम् ।। १०५

---

१ अ. -- मीश्वरः
२ "च" अ. प्रतौ नास्ति ।

नानायुधानि चादित्या मुसलं वसवस्तथा ।।
महाघोराणि शस्त्राणि तारकाद्याश्च दानवाः ।। १०६

स्तंभिता देवदेवेन तथान्ये भुवनेषु ये ।।
पूष्णा दंतान्दशन्दंतैर्बलिमेक्षत मोहितः ।। १०७

तस्यापि दशनाः पेतुर्दृष्टमात्रस्य शंभुना ।।
भगस्य नेत्रे विकृते चकार स्फुटिते च[1] ते ।। १०८

बलं तेजश्च योगांश्च सर्वेषां जगृहे प्रभुः ।।
अथतेषु स्थितेष्वेव मन्युमत्सु सुरेष्वपि ।। १०९

ब्रह्मा ध्यानमुपाश्रित्य बुबोध हरचेष्टितम् ।।
सोऽभिगम्य महादेवं तुष्टाव प्रयतो विधिः ।। ११०

पौराणैः साम संगीतैर्वैदिकैर्गुह्य नामाभिः ।।
नमस्तुभ्यं महादेव महादेव्यै नमोनमः ।। १११

प्रासादात्तव बुद्ध्यादिर्जगदेतत्प्रवर्तते ।।
मूढाश्च देवताः सर्वा[2]नैनं बुध्यंत शंकरम् ।। ११२

---

१ ब "के" पाठः ।
२ नैन बुद्ध्यत शंकर" ।। ब. पाठः

महादेव मिहायातं सर्वदेवनमस्कृतम् ।।
गच्छध्वं शरणं शीघ्रं यदि जीवितमिच्छत ।। ११३

ततः संभ्रम संपन्नास्तुष्टुवुः प्रणताः सुराः ।।
नमोनमो महादेव पाहिपाहि जगत्पते ।। ११४

दुराचारान्भवानस्मानात्मद्रोहैं परायणान् ।।
अहो पश्यत[1] नो मौढ्यं जानंतस्तव भाविनीम्[2] ।। ११५

भार्यामिमां महादेवीं तथाप्यत्र समागताः ।।
युक्तमेतद्दस्माकं राज्यं प्र गृह्येत चासुरैः ।। ११६

यष्ामेवंविधा बुद्धिरस्माभिः किंकृतं त्विदम् ।।
अथ वा नोन दोषोऽस्ति पशवो हि वयंयतः ।। ११७

[3]त्वयैव पतिना सर्वे[4] प्रेरिताः कुर्म हे विभो ।।
ईश्वरः सर्वभूतानां पतिस्त्वं परमेश्वरः ।। ११८

भाम्रस्य खिलं विश्वं यन्त्रारूढ स्वमायया ।।
येन विभ्रामिता मूढाः समायाताः स्वयंवरम् ।। ११९

---

१ ब. पश्यन
२ अ. प्रतौ "भाविनीम" इति पाठः नास्ति ।
३ अ. प्रतौ "त्वयैव" नास्ति ।
४ ब. सर्व

तस्मै पशूनां पतये नमस्तुभ्यं प्रसीद नः[1] ।।
अथ तेषां प्रसन्नो/भूदेव देवस्त्रियंबकः ।। १२०

यथापूर्वं चकारैतान्संस्तवाद्ब्रह्मणः प्रभुः[2] ।।
तारकप्रमुखा दैत्याः संक्रुद्धास्तत्र प्रोचिरे ।। १२१

कोयमंग महादेवो न मन्यामो वयं च तम् ।।
ततः प्रहस्य बालो/सौ हुंकारं लीलयाव्यधात् ।। १२२

हुंकारेणैव ते दैत्याः स्वमेव नगरं गताः ।।
विस्मृतं सकलं तेषां स्वयंवरमुखं च तत ।। १२३

महादेव प्रभावेन दैत्यानां घोरकर्मणाम् ।।
एवं यस्य प्रभावो हि देवदैत्येषु फाल्गुन ।। १२४

कथमीश्वर वाक्यार्थस्तस्मादन्यत्र मुच्यते ।।
असंशयं विमूढास्ते पश्चात्तापः पुरा[3]महान् ।। १२५

इश्वरं भुवनस्यास्य ये भजंते न त्र्यंबकम् ।।
ततः संस्तूयमानः स सुरैः पद्मभुवादिभिः ।। १२६

---

१ ब. प्रसीदतः ।।
२ अ. प्रभो
३ ब. पुरां

वपुश्चकार देवेशस्त्र्यंबकः परमाद्भुतम् ।।
तेजसा तस्य देवास्ते सेंद्रचंद्र दिवाकराः ।। १२७

सब्रह्मकाः ससाध्याश्च वसुर्विश्वे च देवताः[1] ।।
सयमाश्च सरुद्राश्च चक्षुरप्रार्थयन्प्रभुम् ।। १२८

तेभ्यः परत्तमं चक्षुः स्ववपुर्द्रष्टुमुत्तमम् ।।
ददावम्बापतिः शर्वो भवान्याश्चाचलस्य च ।। १२९

लब्ध्वा रुद्रप्रसादेन दिव्यं चक्षुरमुत्तमम् ।।
सब्रह्मकास्तदा देवास्तम पश्यन्महेश्वरम् ।। १३०

ततो जगुश्च मुनयः पुष्प वृष्टिं च खेचराः ।।
मुमुचुश्च तदा नेदुर्देवदुन्दुभयो भृशम् ।। १३१

जगुर्गंधर्व मुख्याश्च ननृतुश्चाप्सरोगणाः ।।
मुमुदुर्गणपाः सर्वे मुमोदांबा च पार्वती ।। १३२

ब्रह्माद्या मेनिरे पूर्णां भवानीं च[2] गिरीश्वरम् ।।
तस्य देवीततो त्दृष्टा समक्षं त्रिदिवौकसाम् ।। १३३

---

१ ब. देवता
२ ब. प्रतौ नास्ति

पादयोः स्थापयामास मालां दिव्यां सुगंधिनीम् ।।
साधुसाध्विति संप्रोच्य[१] तया तं तत्र चर्वितम् ।। १३४

सह देव्या नमश्चक्रुः शिरोभिर्भूतलाश्रितैः ।।
सर्वे सब्रह्मका देवा जयेति च मुदा[२] जगुः ।। १३५

*३ इति श्री स्कांदे महापुराणे........कुमारेश्वर माहात्म्ये श्री महादेव वैवाहिकोत्साह वर्णनं नाम पंचविंशो ऽध्यायः ।।

---

१ "तं प्रोच्य" अ. ब. पाठः ।

२ "मुदिता" अ. पाठः ।

* अ. इति श्री स्कंदपुराणे कुमारिकाखंडे कुमारेश माहात्म्ये पार्वती – स्वयंवरोनाम ।।

ब. इति श्री स्कंद पुराणे कुमारिका खंडे श्री महादेववैवाहिके पंचविंशोऽध्यायः ।।